# Shri Padmavati Sahasranama Stotram

# શ્રીપદ્માવતીસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : shrI padmAvatI sahasranAmastotra 1

File name : padmAvatIsahasranAmastotra.itx

Category : sahasranAma, devii, devI, jaina

Location : doc_devii

Proofread by : DPD, Narayanaswami Pallasena

Description-comments : Traditional from Jain Sampradaya

Source : bhairava-padmAvatI kalpa

Latest update : May 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 7, 2023

*sanskritdocuments.org*

# શ્રીપદ્માવતીસહસ્રનામસ્તોત્રમ્

## અથ પદ્માવતીશતમ્ ।

પ્રણમ્ય પરયા ભક્ત્યા દેવ્યાઃ પાદામ્બુજાં ત્રિધા ।
નામાન્યષ્ટસહસ્રાણિ વક્તું તદ્ભક્તિહેતવે ॥ ૧॥

શ્રીપાર્શ્વનાથચરણામ્બુજચઞ્ચરીકા
ભવ્યાન્ધનેત્રવિમલીકરણે શલાકા ।
નાર્ગેન્દ્રપ્રાણધરણીધરધારણાભૃત્
માં પાતુ સા ભગવતી નિતરામઘેભ્યઃ ॥ ૨॥

ૐ પદ્માવતી પદ્મવર્ણા પદ્મહસ્તાપિ પદ્મિની ।
પદ્માસના પદ્મકર્ણા પદ્માસ્યા પદ્મલોચના ॥ ૩॥

પદ્મા પદ્મદલાક્ષી ચ પદ્મી પદ્મવનસ્થિતા ।
પદ્માલયા પદ્મગન્ધા પદ્મરાગોપરાગિકા ॥ ૪॥

પદ્મપ્રિયા પદ્મનાભિઃ પદ્માઙ્ગા પદ્મશાયિની ।
પદ્મવર્ણવતી પૂતા પવિત્રા પાપનાશિની ॥ ૫॥

પ્રભાવતી પ્રસિદ્ધા ચ પાર્વતી પુરવાસિની ।
પ્રજ્ઞા પ્રહ્લાદિની પ્રીતિઃ પીતાભા પરમેશ્વરી ॥ ૬॥

પાતાલવાસિની પૂર્ણા પદ્મયોનિઃ પ્રિયંવદા ।
પ્રદીપ્તા પાશહસ્તા ચ પરા પારા પરંપરા ॥ ૭॥

પિઙ્ગલા પરમા પૂરા પિઙ્ગા પ્રાચી પ્રતીચિકા ।
પરકાર્યકરા પૃથ્વી પાર્થિવી પૃથિવી પવી ॥ ૮॥

પલ્લવા પાનદા પાત્રા પવિત્રાઙ્ગી ચ પૂતના ।
પ્રભા પતાકિની પીતા પન્નગાધિપશેખરા ॥ ૯॥

પતાકા પદ્મકટિની પતિમાન્યપરાક્રમા ।

પદામ્બુજધરા પુષ્ટિઃ પરમાગમબોધિની ॥ ૧૦॥

પરમાત્મા પરાનન્દા પરમા પાત્રપોષિણી ।
પઞ્ચબાણગતિઃ પૌત્રિ પાષણ્ડઘ્ની પિતામહી ॥ ૧૧॥

પ્રહેલિકાપિ પ્રત્યઞ્ચા પૃથુપાપૌઘનાશિની ।
પૂર્ણચન્દ્રમુખી પુણ્યા પુલોમા પૂર્ણિમા તથા ॥ ૧૨॥

પાવની પરમાનન્દા પણ્ડિતા પણ્ડિતેડિતા ।
પ્રાંશુલભ્યા પ્રમેયા ચ પ્રભા પ્રાકારવર્તિની ॥ ૧૩॥

પ્રધાના પ્રાર્થિતા પ્રાર્થ્યા પદદા પઙ્ક્તિવર્જિની ।
પાતાલસ્યેશ્વરપ્રાણપ્રેયસી પ્રણમામિ તામ્ ॥ ૧૪॥

ઇતિ પદ્માવતીશતમ્ ॥ ૧॥

## અથ મહાજ્યોતિશતમ્ ।

મહાજ્યોતિર્મતી માતા મહામાયા મહાસતી ।
મહાદીપ્તિમતી મિત્રા મહાચણ્ડી ચ મઙ્ગલા ॥ ૧॥

મહીષી માનુષી મેધા મહાલક્ષ્મીર્મનોહરા ।
મહાપ્રહારનિમ્નાઙ્ગા માનિની માનશાલિની ॥ ૨॥

માર્ગદાત્રી મુહૂર્તા ચ માધ્વી મધુમતી મહી ।
માહેશ્વરી મહેજ્યા ચ મુક્તાહારવિભૂષણા ॥ ૩॥

મહામુદ્રા મનોજ્ઞા ચ મહાશ્વેતાતિમોહિની ।
મધુપ્રિયા મતિર્માય મોહિની ચ મનસ્વિની ॥ ૪॥

માહિષ્મતી મહાવેગા માનદા માનહારિણી ।
મહાપ્રભા ચ મદના મન્ત્રવશ્યા મુનિપ્રિયા ॥ ૫॥

મન્ત્રરૂપા ચ મન્ત્રાજ્ઞા મન્ત્રદા મન્ત્રસાગરા ।
મધુપ્રિયા મહાકાયા મહાશીલા મહાભુજા ॥ ૬॥

મહાસના મહારમ્યા મનોભેદા મહાસમા ।
મહાકાન્તિધરા મુક્તિર્મહાવ્રતસહાયિની ॥ ૭॥

મધુશ્રવા મૂર્છના ચ મૃગાક્ષી ચ મૃગાવતી ।

મૃણાલિની મનઃપુષ્ટિર્મહાશક્તિર્મહાર્થદા ॥ ૮॥

મૂલાધારા મૃડાની ચ મત્તમાતઙ્ગગામિની ।
મન્દાકિની મહાવિદ્યા મર્યાદા મેઘમાલિની ॥ ૯॥

માતામહી મન્દગતિઃ મહાકેશી મહીધરા । var મન્દવેગા મન્દગતિઃ મહાશોકા
મહોત્સાહા મહાદેવી મહિલા માનવર્દ્ધિની ॥ ૧૦॥

મહાગ્રહહરા મારી મોક્ષમાર્ગપ્રકાશિની ।
માન્યા માનવતી માનિ મણિનૂપુરશેખરા ॥ ૧૧॥ var શોભિની
મણિકાઞ્ચીધરા માના મહામતિપ્રકાશિની ।
ઈડેશ્વરી દ્વિજયેચ્છેખે ખેન્દ્રાણી કાલરૂપિણી ॥ ૧૨॥

ઇતિ મહાજ્યોતિર્મતિશતમ્ ॥ ૨॥

## અથ જિનમાતાશતમ્ ।

જિનમાતા જિનેન્દ્રા ચ જયન્તી જગદીશ્વરી ।
જયા જયવતી જાયા જનની જનપાલિની ॥ ૧॥

જગન્માતા જગન્માયા જગજ્જૈત્રી જગજ્જિતા ।
જાગરા જર્જરા જૈત્રી યમુનાજલભાસિની ॥ ૨॥

યોગિની યોગમૂલા ચ જગદ્ધાત્રી જલન્ધરા ।
યોગપટ્ટધરા જ્વાલા જ્યોતિરૂપા ચ જાલિની ॥ ૩॥

જ્વાલામુખી જ્વાલમાલા જ્વાલની ચ જગદ્ધિતા ।
જૈનેશ્વરી જિનાધારા જીવની યશપાલિની ॥ ૪॥

યશોદા જ્યાયસી જીર્ણા જર્જરા જ્વરનાશિની ।
જ્વરરૂપા જરા જીર્ણા જાઙ્ગુલાઽઽમયતર્જિની ॥ ૫॥

યુગભારા જગન્મિત્રા યન્ત્રિણી જન્મભૂષિણી ।
યોગેશ્વરી ચ યોર્ગઙ્ગા યોગયુક્તા યુગાદિજા ॥ ૬॥

યથાર્થવાદિની જામ્બૂનદકાન્તિધરા જયા ।
નારાયણી નર્મદા ચ નિમેષા નર્ત્તિની નરી ॥ ૭॥

નીલાનન્તા નિરાકારા નિરાધારા નિરાશ્રયા ।
નૃપવશ્યા નિરામાન્યા નિઃસઙ્ગા નૃપનન્દિની ॥ ૮॥

નૃપધર્મમયી નીતિઃ તોતલા નરપાલિની ।
નન્દા નન્દિવતી નિષ્ટા નીરદા નાગવલ્લભા ॥ ૯॥

નૃત્યપ્રિયા નન્દિની ચ નિત્યા નેકા નિરામિષા। ।
નાગપાશધરા નોકા નિઃકલઙ્કા નિરાગસા ॥ ૧૦॥

નાગવલ્લી નાગકન્યા નાગિની નાગકુણ્ડલી ।
નિદ્રા ચ નાગદમની નેત્રા નારાચવર્ષિણી ॥ ૧૧॥

નિર્વિકારા ચ નિર્વૈરા નાગનાથેશવલ્લભા ।
નિર્લોભા ચ નમસ્તુભ્યં નિત્યાનન્દવિધાયિની ॥ ૧૨॥

ઇતિ જિનમાતાશતમ્ ॥ ૩॥

## અથ વજ્રહસ્તાશતમ્ ।

વજ્રહસ્તા ચ વરદા વજ્રશૈલા વરૂથિની ।
વજ્રા વજ્રાયુધા વાણી વિજયા વિશ્વવ્યાપિની ॥ ૧॥

વસુદા બલદા વીરા વિષયા વિષવર્દ્ધિની ।
વસુન્ધરા વરા વિશ્વા વર્ણિની વાયુગામિની ॥ ૨॥

બહુવર્ણા બીજવતી વિદ્યા બુદ્ધિમતી વિભા ।
વેદ્યા વામવતી વામા વિનિદ્રા વંશભૂષણા ॥ ૩॥

વરારોહા વિશોકા ચ વેદરૂપા વિભૂષણા ।
વિશાલા વારુણીકલ્પા  બાલિકા બાલકપ્રિયા ॥ ૪॥

વર્તિની વિષહા બાલા વિવક્તા વનજાસિની ।
વન્ધ્યા વિધિસુતા બાલા વિશ્વયોનિર્બુધપ્રિયા ॥ ૫॥

બલદા વીરમાતા ચ વસુધા વીરનન્દિની ।
વરાયુધધરા વેષી વારિદા બલશાલિની ॥ ૬॥

બુધમાતા વૈદ્યમાતા બન્ધુરા બન્ધુરૂપિણી ।
વિદ્યાવતી વિશાલાક્ષી વેદમાતા વિભાસ્વરી ॥ ૭॥

વાત્યાલી વિષમા વેષા વેદવેદાઙ્ગધારિણી ।
વેદમાર્ગરતા વ્યક્તા વિલોમા વેદશાલિની ॥ ૮॥

વિશ્વમાતા વિકમ્પા ચ વંશજ્ઞા વિશ્વદીપિકા ।
વસન્તરૂપિણી વર્ષા વિમલા વિવિધાયુધા ॥ ૯॥

વિજ્ઞાનની પવિત્રા ચ વિપઞ્ચી બન્ધમોક્ષિણી ।
વિષરૂપવતી વર્દ્ધા વિનીતા વિશિખા વિભા ॥ ૧૦॥

વ્યાલિની વ્યાલલીલા ચ વ્યામ્રા વ્યાધિવિનાશિની ।
વિમોહા બાણસન્દોહા વર્દ્ધિની વર્દ્ધમાનકા ॥ ૧૧॥

ઈશાની તોતરા ભિદ્રા વરદાયી નમોઽસ્તુ તે ।
વ્યાલેશ્વરી પ્રિયપ્રાણા પ્રેયસી વસુદાયિની ॥ ૧૨॥

ઇતિ વજહસ્તાશતમ્ ॥ ૪॥

## અથ કામદાશતમ્ ।

કામદા કમલા કામ્યા કામાઙ્ગા કામસાધિની ।
કલાવતી કલાપૂર્ણા કલાધારી કનીયસી ॥ ૧॥

કામિની કમનીયાઙ્ગા ક્વણત્કાઞ્ચનસન્નિભા ।
કાત્યાયિની કાન્તિદા ચ કમલા કામરૂપિણી ॥ ૨॥

કામિની કમલામોદા કમ્રા કાન્તિકરી પ્રિયા ।
કાયસ્થા કાલિકા કાલી કુમારી કાલરૂપિણી ॥ ૩॥

કાલાકારા કામધેનુઃ કાશી કમલલોચના ।
કુન્તલા કનકાભા ચ કાશ્મીરા કુઙ્કુમપ્રિયા ॥ ૪॥

કૃપાવતી કુણ્ડલની કુણ્ડલાકારશાયિની ।
કર્કશા કોમલા કાલી કૌલિકી કુલવાલિકા ॥ ૫॥

કાલચક્રધરા કલ્પા કાલિકા કાવ્યકારિકા ।
કવિપ્રિયા ચ કૌશામ્બી કારિણી કોશવર્દ્ધિની ॥ ૬॥

કુશાવતી કિરાલાભા કોશસ્થા કાન્તિબદ્ધની ।
કાદમ્બરી કઠોરસ્થા કૌશામ્બા કોશવાસિની ॥ ૭॥

કાલઘ્રી કાલહનની કુમારજનતી કૃતિઃ ।
કૈવલ્યદાયિની કેકા કર્મહા કલવર્જિની ॥ ૮॥

કલઙ્કરહિતા કન્યા કારુણ્યાલયવાસિની ।
કર્પૂરામોદનિઃશ્વાસા કામવીજવતી કરા ॥ ૯॥

કુલીના કુન્દપુષ્પાભા કુર્કુટોરગવાહિની ।
કલિપ્રિયા કામબાણા  કમઠોપરિશાયિની ॥ ૧૦॥

કઠોરા કઠિના ક્રૂરા કન્દલા કદલીપ્રિયા ।
ક્રોધની ક્રોધરૂપા ચ  ચક્રહૂંકારવર્તિની ॥ ૧૧॥

કામ્બોજિની કાણ્ડરૂપા કોદણ્ડકરધારિણી ।
કુહૂ ક્રીડવતી ક્રીડા કુમારાનન્દદાયિની ॥ ૧૨॥

કમલાસના કેતકી ચ કેતુરૂપા કુતૂહલા ।
કોપિની કોપરૂપા ચ કુસુમાવાસવાસિની ॥ ૧૩॥

ઇતિ કામદાશતમ્ ॥ ૫॥

## અથ સરસ્વતીશતમ્ ।

સરસ્વતી શરણ્યા ચ સહસ્રાક્ષી સરોજગા ।
શિવા સતી સુધારૂપા શિવમાયા સુતા શુભા ॥ ૧॥

સુમેધા સુમુખી શાન્તા સાવિત્રી સાયગામિની ।
સુરોત્તમા સુવર્ણા ચ શ્રીરૂપા શાસ્ત્રશાલિની ॥ ૨॥

શાન્તા સુલોચના સાધ્વી સિદ્ધા સાધ્યા સુધાત્મિકા ।
સારદા સરલા સારા સુવેષા યશવર્ધિની ॥ ૩॥

શઙ્કરી શમિતા શુદ્ધા શક્રમાન્યા શિવઙ્કરી ।
શુદ્ધાહારરતા શ્યામા શીમા શીલવતી શરા ॥ ૪॥

શીતલા સુભગા સર્વા સુકેશી શૈલવાસીની ।
શાલિની સાક્ષિણી સીતા સુભિક્ષા શિયપ્રેયસી ॥ ૫॥

સુવર્ણા શોણવર્ણા ચ સુન્દરી સુરસુન્દરી ।
શક્તિસ્તુષા સારિકા ચ સેવ્યા શ્રીઃ સુજનાર્ચિતા ॥ ૬॥

શિવદૂતી શ્વેતવર્ણા શુભ્રાભા શુભનાશિકી ।
સિંહિકા સકલા  શોભા સ્વામિની શિવપોષિણી ॥ ૭॥

શ્રેયસ્કરી શ્રેયસી ચ શૌરિઃ સૌદામિની શુચિઃ ।
સૌભાગિની શોષિણી ચ સુગન્ધા સુમનઃપ્રિયા ॥ ૮॥

સૌરમેયી સુસુરભી શ્વેતાતપત્રધારિણી ।
શ‍ૃઙ્ગારિણી સત્યવક્તા સિદ્ધાર્થા શીલભૂષણા ॥ ૯॥

સત્યાર્થિની ચ સધ્યાભા શચી સંક્રાન્તિસિદ્ધિદા ।
સંહારકારિણી સિંહી સપ્તર્ચિઃ સફલાર્થદા ॥ ૧૦॥

સત્યા સિન્દૂરવર્ણાભા સિન્દૂરતિલકપ્રિયા ।
સારઙ્ગા સુતરા તુભ્યં તે નમોઽસ્તુ સુયોગિની ॥ ૧૧॥

ઇતિ સરસ્વતીશતમ્ ॥ ૬॥

## અથ ભવનેશ્વરીશતમ્ ।

ભુવનેશ્વરી ભૂષણા ચ ભુવના ભૂમિપપ્રિયા ।
ભૂમિગર્ભા ભૂપવદ્યા ભુજઙ્ગેશપ્રિયા ભગા ॥ ૧॥

ભુજઙ્ગભૂષણાભોગાઃ ભુજઙ્ગાકારશાયિની ।
ભવભિતિહરા ભીમા ભૂમિર્ભીમાટ્ટહાસિની ॥ ૨॥

ભારતી ભવતી ભોગા ભગની ભોગમન્દિરા ।
ભદ્રિકા ભદ્રરૂપા ચ ભૂતાત્મા ભૂતભઞ્જિની ॥ ૩॥

ભવાની ભૈરવી ભીમા ભામિની ભ્રમનાશિની ।
ભુજઙ્ગિની ભ્રુસુણ્ડી ચ મેદિની ભૂમિભૂષણા ॥ ૪॥

ભિન્ના ભાગ્યવતી ભાસા ભોગિની ભોગવલ્લભા ।
ભુક્તિદા ભક્તિગ્રાહા ચ ભવસાગરતારિણી ॥ ૫॥

ભાસ્વતી ભાસ્વરા ભૂર્તિર્ભૂતિદા ભૂતિવર્દ્ધિની ।
ભાગ્યદા ભોગ્યદા ભોગ્યા ભાવિની ભવનાશિની ॥ ૬॥

ભીક્ષ્ણા ભટ્ટારકા ભીરૂર્ભ્રામરી ભ્રમરી ભવા ।
ભટ્ટિની ભાણ્ડદા ભાણ્ડા ભલ્લાકી ભૂરિભઞ્જિની ॥ ૭॥

ભૂમિગા ભૂમિદા ભાષા ભક્ષિણી ભૃગુભઞ્જિની ।
ભારાક્રાન્તાભિનન્દા ચ ભજિની ભૂમિપાલિની ॥ ૮॥

ભદ્રા ભગવતી ભર્ગા વત્સલા ભગશાલિની ।
ખેચરી ખડ્ગહસ્તા ચ ખણ્ડિની ખલમર્દ્દિની ॥ ૯॥

ખટ્વાઙ્ગધારિણી ખડ્ગા ખડઙ્ગા ખગવાહિની ।
ષટ્ચક્રભેદવિખ્યાતા ખગપૂજ્યા ખગેશ્વરી ॥ ૧૦॥

લાઙ્ગલી લલના લેખા લેખિની લલના લતા ।
લક્ષ્મીર્લક્ષ્મવતિ લક્ષ્મ્યા લાભદા લોભવર્જિતા ॥ ૧૧॥

ઇતિ ભુવનેશ્વરીશતમ્ ॥ ૭॥

## અથ લીલાવતીશતમ્ ।

લીલાવતી લલામાભા લોહમુદ્રા લિપિપ્રિયા ।
લોકેશ્વરી ચ લોકાઙ્ગા લબ્ધિર્લોકાન્તપાલિની ॥ ૧॥

લીલા લીલાઙ્ગદા લોલા લાવણ્યા લલિતાર્થિની ।
લોભહા લમ્બનિર્લઙ્કા લક્ષણા લક્ષ્યવર્જિતા ॥ ૨॥

ઉર્મોવસી ઉદીચી ચ ઉદ્યોતોદ્યોતકારિણી ।
ઉદ્ધારણ્યા ધરોદક્યો દિવ્યોદકનિવાસિની ॥ ૩॥

ઉદાહારોત્તમાતંસા ઔષધ્યુદધિતારણી ।
ઉત્તરોત્તરવાદિભ્યો ધરાધરનિવાસિની ॥ ૪॥

ઉત્કીલન્ત્યુત્કીલિની ચ ઉત્કીર્ણોંકારરૂપિણિ ।
ૐકારાકારરૂપા ચ અમ્બિકાડમ્બરચારિણી ॥ ૫॥

આમોઘા સા પુરી ચાન્તાઽણિમાદિગુણસંયુતા ।
અનાદિનિધનાઽનન્તા ચાતુલાટાઽટ્ટહાસિની ॥ ૬॥

અપર્ણાર્દ્ધબિન્દુધરા લોકાલલ્યાલિવાઙ્ગના ।
આનન્દાનન્દદા લોકા રાષ્ટ્રસિદ્ધિપ્રદાનકા ॥ ૭॥

અવ્યક્તાસ્ત્રમયી મૂર્તિરજીર્ણા જીણહારિણી ।
અહિકૃત્ય રજાજારા હુંકારરાતિરન્તિદા ॥ ૮॥

અનુરૂપાથ મૂર્ત્તિઘ્ની  ક્રીડા કૈરવપાલિની ।
અનોકહાશુગા ભેદ્યા છેદ્યા ચાકાશગામિની ॥ ૯॥

અનન્તરા સાધિકારા ત્વાઙ્ગા અનન્તરનાશિની ।
અલકા યવના લઙ્ધ્યા સીતા શિખરધારિણી ॥ ૧૦॥

અહિનાથપ્રિયપ્રાણા નમસ્તુભ્યં મહેશ્વરી ।
આકર્ષણ્યાધરા રાગા મન્દા મોદાવધારિણી ॥ ૧૧॥

ઇતિ લીલાવતીશતમ્ ॥ ૮॥

## અથ ત્રિનેત્રાશતમ્ ।

ત્રિનેત્રા ત્ર્યમ્બિકા તન્ત્રી ત્રિપુરા ત્રિપુરભૈરવી ।
ત્રિપુષ્ટા ત્રિફણા તારા તોતલા ત્વરિતા તુલા ॥ ૧॥

તપપ્રિયા તાપસી ચ તપોનિષ્ઠા તપસ્વિની ।
ત્રૈલોક્યદીપકા ત્રેધા ત્રિસન્ધ્યા ત્રિપદાશ્રયા ॥ ૨॥

ત્રિરૂપા ત્રિપદા ત્રાણા તારા ત્રિપુરસુન્દરી ।
ત્રિલોચના ત્રિપથગા તારા માનવિમર્દિની ॥ ૩॥

ધર્મપ્રિયા ધર્મદા ચ ધર્મિણી ધર્મપાલિની ।
ધારાધરધરાધારા ધાત્રી ધર્માઙ્ગપાલિની ॥ ૪॥

ધૌતા ધૃતિધુરા ધીરા ધુનુની ચ ધનુર્દ્ધરા ।
બ્રહ્માણી બ્રહ્મગોત્રા ચ બ્રાહ્મણી બ્રહ્મપાલિની ॥ ૫॥

ગઙ્ગા ગોદાવરી ગૌગા ગાયત્રી ગણપાલિની ।
ગોચરી ગોમતી ગુર્વાઽગાધા ગાન્ધારિણી ગુહા ॥ ૬॥

બ્રાહ્મી વિદ્યુત્પ્રભા વીરા વીણાવાસવપૂજિતા ।
ગીતાપ્રિયા ગર્ભધારા ગા ગાયિની ગજગામિની ॥ ૭॥

ગરીયસી ગુણોપેતા ગરિષ્ઠા ગરમર્દિની ।
ગમ્ભીરા ગુરુરૂપા ચ ગીતા ગર્વાપહારિણી ॥ ૮॥

ગ્રહિણી ગ્રાહિણી ગૌરી ગન્ધારી ગન્ધવાસના ।
ગારુડી ગાસિની ગૂઢા ગૌહની ગુણહાયિની ॥ ૯॥

ચક્રમધ્યા ચક્રધરા ચિત્રણી ચિત્રરૂપિણી ।
ચર્ચરી ચતુરા ચિત્રા ચિત્રમાયા ચતુર્ભુજા ॥ ૧૦॥

ચન્દ્રાભા ચન્દ્રવર્ણા ચ ચક્રિણી ચક્રધારિણી ।
ચક્રાયુધા કરધરા ચણ્ડી ચણ્ડપરાક્રમા ॥ ૧૧॥

ઇતિ ત્રિનેત્રાશતમ્ ॥ ૯॥

## અથ ચક્રેશ્વરીશતમ્ ।

ચક્રેશ્વરી ચમૂશ્ચિન્તા ચાપિની ચઞ્ચલાત્મિકા ।
ચન્દ્રલેખા ચન્દ્રભાગા ચન્દ્રિકા ચન્દ્રમણ્ડલા ॥ ૧॥

ચન્દ્રકાન્તિશ્ચન્દ્રમશ્રીશ્ચન્દ્રમણ્ડલવર્તિની ।
ચતુ સમુદ્રપારાન્તા ચતુરાશ્રમવાસિની ॥ ૨॥

ચતુર્મુખી ચન્દ્રમુખી ચતુર્વર્ણફલપ્રદા ।
ચિત્સ્વરૂપા ચિદાનન્દા ચિરાશ્ચિન્તામણિઃ પિતા ॥ ૩॥

ચન્દ્રહાસા ચ ચામુણ્ડા ચિન્તના ચૌરવર્જિની ।
ચૈત્યપ્રિયા ચત્યલીલા ચિન્તનાર્થફલપ્રદા ॥ ૪॥

હ્રીંરૂપા હંસગમની હાકિની હિઙ્ગુલાહીતા ।
હાલાહલધરા હારા હંસવર્ણા ચ હર્ષદા ॥ ૫॥

હિમાની હરિતા હીરા હર્ષિણી હરિમર્દિની ।
ગોપિની ગૌરગીતા ચ દુર્ગા દુર્લલિતા ધરા ॥ ૬॥

દામિની દીર્ઘિકા દુગ્ધા દુર્ગમા દુર્લભોદયા ।
દ્વારિકા દક્ષિણા દીક્ષા દક્ષા દક્ષાતિપૂજિતા ॥ ૭॥

દમયન્તી દાનવતી દ્યુતિદીપ્રા દિવાગતિઃ ।
દરિદ્રહા વૈરિદૂરા દારા દુર્ગાતિનાશિની ॥ ૮॥

દર્પહા દૈત્યદાસા ચ દર્શિની દર્શનપ્રિયા ।
વૃષપ્રિયા ચ વૃષભા વૃષારૂઢા પ્રબોધિની ॥ ૯॥

સૂક્ષ્મા સૂક્ષ્મગતિઃ શ્લક્ષ્ણા ધનમાલા ધનદ્યૂતિ ।
છાયા છાત્રચ્છવિચ્છિરક્ષીરાદા ક્ષેત્રરક્ષિણી ॥ ૧૦॥

અમરી રતિરાત્રીશ્ચ રઙ્ગિની રતિદા રુષા ।
સ્થૂલા સ્થૂલતરા સ્થૂલા સ્થણ્ડિલાશયવાસિની ॥ ૧૧॥

સ્થિરા સ્થાનવતી દેવી ઘનઘોરનિનાદિની ।
ક્ષેમઙ્કુરી ક્ષેમવતી ક્ષેમદા ક્ષેમવર્દ્ધિની ॥ ૧૨॥

શેલૂષરૂપિણી શિષ્ટા સંસારાર્ણવતારિણી ।
સદા સહાયિની તુભ્યં નમસ્તુભ્યં મહેશ્વરી ॥ ૧૩॥

ઇતી ચક્રેશ્વરીશતમ્ ॥ ૧૦॥

## ફલશ્રુતિઃ

નિત્યં પુમાન્ પઠતિ યો નિતરાં ત્રિશુદ્ધ્યા
    શૌચં વિધાય વિમલં ફણિશેખરાયાઃ ।
સ્તોત્રં ધ્રુનાથ ઉદિતે સુસહસ્રનામ
    ચાષ્ટોત્તરં ભવતિ સો ભવનાધિરાજઃ ॥ ૧॥

તત્કાલજાતવરગોમયલિપ્તભૂમૌ
    કુર્યાદ્ દૃઢાસનમતીન્દ્રિયપદ્મકાખ્યમ્ ।
ધૂપં વિધાય વરગુગ્ગુલુમાજ્યયુક્તં
    રક્તામ્બરં વપુષિ ભૂપ્ય મનઃ પ્રશસ્તઃ ॥ ૨॥

ન તસ્ય રાત્રૌ ભયમસ્તિ કિઞ્ચિન્ન શોકરોગોદ્ભવદુઃખજાલમ્ ।
ન રાજપીડા ન ચ દુર્જનસ્ય પદ્માવતીસ્તોત્ર નિશમ્યતાં વે ॥ ૩॥

ન બન્ધનં તસ્ય ન વહ્નિજાતં
    ભયં ન ચારેર્નૃપતોઽપિ કિઞ્ચિત્ ।
ન મત્તનાગસ્ય ન કેશરીભયં
    યો નિત્યપાઠી સ્તવનસ્વ પદ્મે! ॥ ૪॥

ન સઙ્ગરે શસ્ત્રચયાભિઘાતઃ
    ન વ્યાઘ્રભીતિર્ભુવિ ભીતિભીતિઃ ।
પિશાચિનીનાં ન ચ ડાકિનીનાં
    સ્તોત્રં રમાયાઃ પઠતીતિ યો વં ॥ ૫॥

ન રાક્ષસાનાં ન ચ શાકિનીનાં
    ન ચાપદા નૈવ દરિદ્રતા ચ ।
ન ચાસ્ય મૃત્યોર્ભયમસ્તિ કિઞ્ચિત્

પદ્માવતીસ્તોત્ર નિશમ્યતાં વૈ ॥ ૬॥

સ્નાનં વિધાય વિધિવદ્ ભુવિ પાર્શ્વભર્તુઃ
પૂજાં કરોતિ શુચિદ્રવ્યચયૈર્વિધિજ્ઞઃ ।
પદ્માવતી ફલતિ તસ્ય મનોઽભિલાષં
નાનાવિધં ભવભવં સુખસારભૂતમ્ ॥ ૭॥

સુપૂર્વાહ્નમધ્યાહ્નસન્ધ્યાસુ પાઠં
તથૈવાવકાશં ભવેદેકચિત્તઃ ।
ભવેત્તસ્ય લાભાર્થં આદિત્યવારે
કરોતીહ ભક્તિં સદા પાર્શ્વભર્તુઃ ॥ ૮॥

શુભાપત્યલક્ષ્મીર્નુ વાજીન્દ્રયૂથા
ગૃહે તસ્ય નિત્યં સદા સઞ્ચરન્તિ
નવીનાઙ્ગનાનાં ગણાસ્તસ્ય નિત્યં
શિવાયાઃ સુનામાવલિર્યસ્ય ચિત્તે ॥ ૯॥

મમાલ્પબુદ્ધ્યા સ્તવનં વિધાય var મમાલ્પવદ્ધેઃ
કરોમિ ભક્તિં ફણિશેસ્વરાયાઃ ।
યદર્થમન્ત્રાક્ષરવ્યઞ્જનચ્યુતં
વિશોધનીયં કૃપયા હિ સદ્ભિઃ ॥ ૧૦॥

ભો દેવિ! ભો માત! મમાપરાધં
સંક્ષમ્યતિ તત્સ્તવનાભિધાને ।
માતા યથાપત્યકૃતાપરાધં
સંક્ષમ્યતિ પ્રીત્યપલાયનૈક્યમ્ ॥ ૧૧॥

॥ ઇતિ શ્રીભૈરવપદ્માવતીકલ્પે
પદ્માવતીસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

જપં

(૧) ૐ હ્રીં શ્રીં ક્લીં બ્લૈં કલિકુણ્ડસ્વામિન્! સિદ્ધિશ્થિમિયં
જગદ્ વશ્યમાનય આનય સ્વાહા ॥ ૧૦૮॥

(૨) ૐ હ્રીં ઐં શ્રીં શ્રીગૌતમગણરાજાય સ્વાહા ॥ લક્ષ ૧॥

(૩) ક્ષ્વ નમો ચાલિદેવિ! પદ્માવતિ! આકૃષ્ટિકરણિ! કામચારિ,
મોહચારિ, અબોલુ વોલાવિ, અદયનું દિવારિ,

આણિ પાસિ ઘાલિ દાસુ ૐ ફટ્ સ્વાહા ।
જાપ ૨૪ સહસ્રમ્ । પ્રત્યહં ૧૦૮ જપનીયમ્ । વશ્યમ્ ॥

(૪) ઓં આં ઐં ક્રોં હ્રીં હસરૂપે! સર્વવશ્યે!
શ્રીં સોહં પદ્માવત્યૈ હ્રીં નમઃ ૫૦ । જાપોડયં દીપોત્સવે ।
ઘૃરતદીપોડખણ્ડઃ રક્ષણીયઃ ।
દિન ૩ જાપ ૨૫ સહસ્ર કીજે । ત૦ ૧૨ સહસ્ર કીજે । પચામુત હોમ ।
સર્વાર્થસિદ્ધિ । નિત્યપાઠ ૨૧ ॥

॥ શુભં ભવતુ ॥

Proofread by DPD, Pallasena Narayanaswami ppnswami at gmail.com

*Shri Padmavati Sahasranama Stotram*

pdf was typeset on April 7, 2023

Please send corrections to *sanskrit@cheerful.com*